## पत्रिका– ५

### संस्कृतवाक्यान्यङ्ग्लजीभाषया विद्यार्थिनो विपरिणमयेयुः ।

१) त्रिलोचनं प्रणम्य गच्छति ।

२) भोगेभ्यः स्पृहयालवः ।

३) वनाय गां मुमोच ।

४) मूत्राय कल्पते यवागूः ।

५) स्वागतं देव्यै ।

६) माता तस्मा आम्रफलं ददाति ।

७) आत्मनो वृत्तान्तं तस्मै न्यवेदयत् ।

८) भोजेन दूतो रघवे विसृष्टः ।

९) मनसा हिरं व्रजति ।

१०) पर्वतो वह्निमान् धूमात् ।

११) सत्यादनृतं श्रेयः ।

१२) नेश्वरो जगतः कारणमुपपद्यते । कुतः वैषम्यनैर्घृण्यप्रसङ्गात् ।

१३) अश्वमेधसहस्रेभ्यः सत्यमेवातिरिच्यते ।

१४) पापाज्जुगुप्सते ।

१५) उपाध्यायादधीते ।

१६) गोमयाद्वृश्चिको जायते ।

१७) हिमवतो गङ्गा प्रभवति ।

१८) न भीतो मरणदास्मि ।

१९) शैवात् प्रभृति पोषिता ।

२०) गवां गोषु वा कृष्णा बहुक्षीरा ।

२१) बाणो बलिसुते शरे इत्यमरः ।

२२) न तापसकन्यकायां शकुन्तलायां ममाभिलाषः ।

२३) दैवमेव हि नृणां वृद्धौ क्षये कारणम् ।

२४) आर्योऽस्मिन् विनयेन वर्तताम् ।

२५) न बाणः सन्निपात्योऽस्मिन्मृगशरीरे।

२६) रामोऽक्षद्यूते निपुणः।

२७)अद्य दशमो मासस्तातस्योपरतस्य।

२८)कतिपये संवत्सरास्तस्य तपस्तप्यमानस्य।

२९)प्रकृत्यैव प्रिया सीता रामस्यासीत्।

३०)कायः कस्य न वल्लभः।

३१) अत्र भवतो मम च समुद्रपल्वलयोरिवान्तरम्।

३२) राजा भगवतो नारायणं वा नारायणस्य वाऽनुकरोति।

३३) महाराजः क्रतूनामाहर्ता।

३४) नायं गात्राणामीष्टे।

३५) ननु प्रभवत्यार्यः शिष्यजनस्य।

३६) धनपतिगृहानुत्तरेण

३७)उपर्युपरि लोकं हरिः। अधोऽधो लोकम्।

३८) अनभिज्ञो गुणानां यः स भृत्यैर्नानुगम्यते।

३९) यावदसौ तस्मात् तरुशिखरात् नावतरति तावदहं पितरमुपरतमुत्सृज्य नातिदूरवर्तिनस्तमालविटपिनो मूलदेशमविशम्।

४०)कथं मे इष्टसिद्धिः स्यादिति चिन्तयतस्तस्य सकला शर्वरी व्यतीता।

४१) अस्मिन् महति दुःखार्णवे निमग्नः स कथं नाम सुखभाग्भवेत्।

४२)पितरमनुरुध्येध्वं गुरोः शासनं तिष्ठेत सत्यं ब्रूयात सद्भिः संपर्चेत सदेश्वरस्य माहात्म्यं मनसि विभावयेत।

४३) त्वमस्मिन् सूचिभेद्ये तमस्युद्यानं गच्छेश्चेत् मां च पुष्पाण्यानयेश्चेदहं त्वां धीरप्रकृतिकं मन्येय।

४४)तं विचित्रं वृत्तान्तं श्रुत्वा किं मया कर्तव्यं वक्तव्यं वा( किमहं कुर्यां वच्यां वेति) इति नाजानम्।

४५)कोऽन्यः सूर्यादाकाशं निरस्तनैशतमः कुर्यात्।

४६) अपि नाम चाणाक्यो नन्दपक्षं गृह्णीयात्।

४७) भवतां तपांसि निष्प्रत्यूहानि प्रवर्तन्ते कच्चित्।

४८) नाहमागच्छेयम्।

४९)यद्यहं क्रीडेयमन्या मक्षिका मामलसां वदेयुः।

५०)अस्य गोर्लाङ्गूलं चेत् त्वं दृढमवलम्बेथाः, अयं त्वां ग्रामं नयेत्।